परप्रतिनप्ता, [ऋ] } पुं, (प्रतिनप्तुः परः अन्तरः।) वृद्धप्रपौत्रः।
परप्रपौत्रः } इति हेमचन्द्रः॥

परभागः, पुं, (परस्य श्रेष्ठस्य भागः।) गुणोत्कर्षः। इति हेमचन्द्रः॥ (यथा, रघुः। ५।७०॥
"आभाति लब्धपरभागतयाऽधरोष्ठे
लीलास्मितं सदशनार्च्चिरिव त्वदीयम्॥")
सुसम्पत्। इति त्रिकाण्डशेषः॥ शेषांशश्च॥

परभुक्ता, स्त्री, (परेण परपुरुषेण भुक्ता।) अन्यपुरुषसम्भोगविशिष्टा। यथा,—
"परभुक्तान्तु कान्तान्तु यो भुङ्क्ते स नराधमः।
स पच्यते कालसूत्रे यावच्चन्द्रदिवाकरौ॥
न सा दैवे न सा पैत्रे पाकार्हा पापसंयुता।
तस्या आलिङ्गने भर्त्ता भ्रष्टशीलजसा हतः॥
देवताः पितरस्तस्य हव्यदाने च तर्पणे।
सुखिनो न भवन्त्येवमित्याह कमलोद्भवः॥
तस्माद्दुयत्नेन भार्य्यायाश्च रक्षणं कुरुते सुधीः।
अन्यथा पापिनीभर्त्ता निश्चितं नरकं व्रजेत्॥
पदे पदे सावधानः कान्तां रक्षति पण्डितः।
न प्रतीतिस्थली योषा दोषाणाञ्च करण्डिका॥
कलत्रं पाकपात्रञ्च सदा रक्षितुमर्हति।
परस्पर्शादशुद्धाञ्च शुद्धा स्वस्पर्शने सदा॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १८ अध्यायः॥*॥
अन्येन भक्षिते त्रि॥

परभृत्, पुं, (परान् कोकिलान् बिभर्त्तीति। डु भृञ् धारणपोषणयोः + क्विप्। ...) --

परभृत्, पुं, (परान् कोकिलान् बिभर्त्तीति। डु भृञ् लि भृतिपुष्टौ + क्विप्। परेषां भृदिति केचित्।) काकः। इत्यमरः। २। ५। २०॥ (परजनपोषके, त्रि। यथा, भागवते। २। २। ५।
"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्॥")

परभृतः, पुं, (परेण काकेन भृतः पुष्टः।) कोकिलः। इत्यमरः। २। ५। १९॥ (यथा, मृच्छकटीये।
"परभृत इव नीडे रक्षितो वायसीभिः॥"
स्त्रियां टाप्। यथा, रघौ। ९। ४७।
"परभृताभिरितीव निवेदिते
स्मरमते रमते स्म वधूजनः॥"
तथाच कुमारे। ६। २।
"चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी॥"
अत्र मल्लिनाथः। "परभृतया कोकिलया उन्मुखी मुखरा। परभृतेति क्रियाशब्दविवक्षायां 'जातेरस्त्री' इति ङीप् प्रत्ययो न भवति। अथवा भृङ्करणं सम्पदादित्वात् क्विप्। परैः भृत्यस्यास्तया परभृता इति व्यासेन व्याख्यातम्। पदमञ्जरीकारस्तु परैः भ्रियते इति कर्म्मणि क्विपमाह॥") परपोषिते त्रि॥

परम्, व्य, (पॄ पूर्त्तौ + अम्।) नियोगः। क्षेपः। इति मेदिनी॥ पश्चात्॥ (किन्त्वर्थे। यथा, पञ्चतन्त्रे।
"तेषां सर्व्वे शास्त्रपारगाः परं बुद्धिरहिताः॥"
अधिकम्। यथा, रघुः। १। १७।
"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्॥"
अनन्तरम्। यथा, तत्रैव। १। ६६।
"नूनं मत्तःपरं वंश्याः पिण्डविच्छेददर्शिनः॥")

परम, व्य, अनुज्ञा। इति मेदिनी॥ हाँ इति भाषा। तथा च। ओमेवं परमं मते। इत्यमरः। ३। ४। १२॥ त्रीणि मते अनुमतौ। ओं कुरु ओमित्युक्तवतः। एवं वाढ़ं एवं यदाह भगवान्। परमन्ते आवसं ममेदं परमम्। त्रयं प्रकारेऽपि। इति भरतः॥

परमः, त्रि, (परं उत्कृष्टं मातीति। "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) परः। उत्कृष्टः। इति मेदिनी॥ (यथा, मनुः। ९। ३१९।
"सर्व्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत्॥")
प्रधानम्। (यथा, मनुः। ६। ९६।
"एवं संन्यस्य कर्म्माणि स्वकार्य्यपरमोऽस्पृहः॥")
आद्यः। ओङ्कारः। इति विश्वः॥ (यथा, कुमारे। ६। ३५।
"ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम्॥")
अग्रेसरः। इति हेमचन्द्रः॥ (महादेवः। यथा, महाभारते। १३। १७। ५१।
"मन्त्रवित् परमोमन्त्रः सर्व्वभावकरो हरः॥")

परमगतिः, स्त्री, (परमा गतिः।) मुक्तिः। मोक्षहेतौ त्रि। यथा। गुणातीतोऽप्याशस्त्रिगुणसचिवस्त्र्यक्षरमयस्त्रिमूर्त्तिर्यः सृष्टिस्थितिविलयकर्म्माणि कुरुते। कृपापारावारः परमगतिरेष त्रिजगतां नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे॥ इति मङ्गलवादः॥ तस्या लक्षणं यथा,—
"यां विप्राः सर्व्वतः शान्ता विशुद्धा ज्ञाननिश्चयाः।
गतिं गच्छन्ति सन्तुष्टास्तामाहुः परमां गतिम्॥"
इति महाभारते मोक्षधर्म्मः॥

परमगवः, पुं, स्त्री, परमश्चासौ गौश्चेति श्रेष्ठगौः।

परमपदः, पुं, क्ली, (पद्यते ज्ञानिभिः प्राप्यते इति पदम्। ततः कर्म्मधारयः।) श्रेष्ठस्थानम्। पर देवताचरणः। यथा। स्वपुष्पैराकीर्णे कुसुमधनुषो मन्दिरमहो पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम्। स गन्धर्व्वश्रेणीपतिरपि कवित्वाम्बुतनदीनदीनः पर्य्यन्ते परमपदलीनः प्रभवति॥ इति कर्पूराख्यस्तोत्रम्॥

परमब्रह्म, [न्] क्ली, (परमं ब्रह्म।) परमेश्वरः। नारायणः। यथा।
सत्यतपा उवाच।
"यदेतत् परमं ब्रह्म त्वया प्रोक्तं महामुने!।
तस्य रूपं न जानन्ति योगिनोऽपि महात्मनः॥
अनामगोत्ररहितममूर्त्तं मूर्त्तिवर्ज्जितम्।
कथं तज्ज्ञायते ब्रह्म संज्ञानामविवर्ज्जितम्॥
तत्तस्य संज्ञां कथय येन जानाम्यहं गुरो!॥"
दुर्व्वासा उवाच।
"यदेतत् परमं ब्रह्म वेदवादेषु पठ्यते।
स देवः पुण्डरीकाक्षः स्वयं नारायणः परः॥
स यज्ञैर्विविधैरिष्टैर्दानैर्दत्तैश्च सत्तम!।
प्राप्यते परमो देवः स्वयं नारायणो हरिः॥"
इति वराहपुराणम्॥

परमर्षिः, पुं, (परमश्चासौ ऋषिश्चेति।) अस्य व्युत्पत्तिर्यथा,—
"ऋषिर्हिंसागतौ धातुर्विद्यासत्यतपःश्रुतेः।
एष सन्निचयो यस्मात् ब्रह्मणश्च ततस्त्वृषिः॥
निवृत्तिसमकालन्तु बुद्ध्या व्यक्तिर्ऋषिस्त्वयम्।
ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः॥
गत्यर्थादृषतेर्धातोर्नामानि वृत्तिकारणम्।
यस्मादेष स्वयं भूतस्तस्माच्च ऋषिता मता॥"
इति मात्स्ये १२० अध्यायः॥
भेलादिऋषिविशेषः। इति त्रिकाण्डशेषः॥ (वेदव्यासो हि परमर्षिः। यथा, महाभारते। १। १। १७।
"द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा॥")

परमस्वधर्म्मा, [न्] त्रि, परमस्वो धर्म्मो यस्य। इति कर्म्मधारयपूर्व्वपदबहुव्रीहौ सिद्धान्तकौमुदी॥

परमहंसः, पुं, (परमः श्रेष्ठः हंसः सोऽहं आत्मा यस्य।) सन्न्यासिविशेषः। अस्य लक्षणं यथा। जातरूपधरो निर्द्वन्द्वो निराग्रहस्तत्त्वब्रह्ममार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले भैक्षमाचरन् लाभालाभौ समौ कृत्वा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिर्झरस्थण्डिलेष्वनिकेतवासी निष्प्रयत्नो निर्म्ममः शुक्लध्यानपरायणः अध्यात्मनिष्ठः शुभाशुभकर्म्मनिर्मूलनाय सन्न्यासेन देहत्यागं करोति यः स एव परमहंसो नामेति जीवन्मुक्तिविवेकः॥ (अयं हि चतुर्व्विधावधूतेषु श्रेष्ठः। यदुक्तं महानिर्व्वाणतन्त्रे।
"चतुर्णामवधूतानां तुरीयो हंस उच्यते।
त्रयोऽन्ये भोगयोगाढ्या मुक्ताः सर्व्वे शिवोपमाः॥"
परमहंसेन हि यज्ञोपवीतादिचिह्नानि परित्यज्य कौपीनादिकं धारणीयम्। यदुक्तं सूतसंहितायां ज्ञानयोगे।
"परमहंसस्त्रिदण्डञ्च रज्जुं गोवालमिश्रितम्।
शिक्यं जलपवित्रञ्च पवित्रञ्च कमण्डलुम्॥
पक्षिणीमजिनं सूचीं मृत् खनित्रीं कृपाणिकाम्।
शिखां यज्ञोपवीतञ्च नित्यकर्म्म परित्यजेत्॥
कौपीनं छादनं वस्त्रं कन्थां शीतनिवारिकाम्।
योगपट्टं बहिर्वस्त्रं पादुकां छत्रमद्भुतम्॥
अक्षमालाञ्च गृह्णीयात् वैणवं दण्डमव्रणम्।
अग्निरित्यादिभिर्मन्त्रैः कुर्य्यादुद्धूलनं सदा॥
त्र्यामिति च त्रिभिः प्रोक्ष्य परमहंसस्त्रिपुण्ड्रकम्॥"
अविदुषा परमहंसेन एकदण्डं धार्य्यम्। विदुषा तु दण्डादिकं किमपि न धारणीयम्। यदुक्तं निर्णयसिन्धौ। "परमहंसस्यैकदण्ड एव सोऽप्यविदुषः। विदुषान्तु सोऽपि नास्ति। न दण्डं न शिखां नाच्छादनं धरति परमहंसः॥" परमहंसास्तु केवलं प्रणवजपतत्परा एव भवन्ति। यदुक्तं सूतसंहितायाम्।
"प्रणवाद्यास्त्रयोवेदाः प्रणवे पर्य्यवस्थिताः।
तस्मात् प्रणवमेवैकं परमहंसः सदा जपेत्॥
विविक्तदेशमाश्रित्य सुखासीनः समाहितः।
यथाशक्ति समाधिस्थो भवेत् सन्न्यासिनां वरः॥"
परमहंसास्तु "तत्त्वमसि" इत्यादि महावाक्याव-